२२४ ३०२१७०

सं० ७

सतोग.

# गर्भेगोध

६९८ | रुत 39

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

॥श्रीगणेशायनमः॥गजेंद्रमोक्षप्रारंभः॥शतानीकउवाच॥राम
मयाहिदेवदेवस्यविष्णोरमिततेजसः॥श्रुताःसंभूतयःसर्वाःगदेस्तव न
स्कथ्रत॥१॥ यदिप्रसन्नोभगवानअनुग्राह्योस्मितेयदि॥तदहंश्रो
तुमिच्छामिनृणांदुःस्वप्ननाशनं॥२॥ स्वप्ना हिरूमहाभागदर्शतेव
सुभाशुभाः॥फलानितिप्रयच्छंतितद्गुणान्येवभार्गव॥३॥ यादृकपु
ण्यंपवित्रंचनृणांमपिशुभप्रदं॥दुःस्वप्नोपशमायालंतन्मेविस्तर
र्द्दीतोवद॥४॥शौनकउवाच॥इदमेवमहाराजपृष्टवांस्ते पितामहं
महा देवव्रतंपुण्यंसर्वशास्त्रविशारदं॥५॥भीष्मंधर्मभृतांश्रेष्ठंधर्मपुत्रो
युधिष्ठिरः॥भीष्मउवाच॥नमस्तेपुंडरीकाक्षनमस्तेविश्वभाव
न॥६॥ नमस्तेस्तुहृषीकेशमहापुरुषपूर्वज॥ अयंपुराणमी

(1A)

शानंपुरुहूतंपुरुस्तुतं ॥७॥ ऋतमेकाक्षरंब्रह्मव्यक्ताव्यक्तंसनात
नं ॥ असतस्सच्चैवयदिदंविश्वंसदसदात्मकं ॥८॥ परावराणांस्रष्टारंपु
राणंपरमव्ययं ॥ मंगल्यंमंगलंविष्णुंवरेण्यमनघंशुचिं ॥९॥ नमस्कृ
त्यहृषीकेशंचराचरगुरुंहरिं ॥ प्रवक्ष्यामिमतंपुण्यंकृष्णद्वैपायन
स्यच ॥१०॥ येनोक्तेनश्रुतेनापिनश्यतेसर्वपातकं ॥ नारायणस
मोदेवोनभूतोनभविष्यति ॥ एतेनसत्यवाक्येनसर्वार्थान्साधया
म्यहं ॥१२॥ पक्षेबहुज्ञंपरमप्युदारंयाद्वीपमध्येस्कृतमात्मवंतं ॥
पराशराद्गंधवतीमहर्षेस्तस्मैनमोज्ञाननतमोनुदाय ॥१३॥ नमो
भगवतेतस्मैव्यासायामिततेजसे ॥ यस्यप्रसादाद्वक्ष्यामिनारा
यणकथामिमां ॥१४॥ वैशंपायनमासीनंपुराणार्थेविचक्षणं

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2)

इदमर्थंसराजर्षिः पृष्टवान्जनमेजयः ॥१५॥ जनमेजयउवाच ॥ किंज
पन्मुच्यतेजंतुः किंजपन्सुखमश्नुते ॥ दुःस्वप्ननाशनंपुण्यंश्रोतुमि
छामितत्वतः ॥१६॥ वैशंपायनउवाच ॥ पुरायधर्मराजेनपृष्टोवै
त्वपितामहाः ॥ भिष्मोवैव्रतिनांश्रेष्ठतदहंकथयामिते ॥१७॥ दे
वव्रतमहाप्राज्ञसर्वशास्त्रविशारद ॥ विनयेनोपसंगम्यपर्यपृछ
द्युधिष्ठिरः ॥१८॥ युधिष्ठिरउवाच ॥ दुःस्वप्नदर्शनंघोरमवेक्ष्य
भरतर्षभ ॥ प्रयतःकिंजपेज्जाप्यंविबुधःकिमनुस्मरेत् ॥१९॥ पि
तामहप्रसादेनबुद्धिभेदोस्यभूत्मम ॥ तदहंश्रोतुमिछामिब्रूहिमे
वदतांवर ॥२०॥ भिष्मोवाच ॥ शृणुराजन्महाबाहोवर्णयि
ष्येतशांतिकं ॥ दुःस्वप्ननाशनंनित्यंयज्जाप्यंसुसमाहितैः ॥२१॥





the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2B)

जें अत्राप्युदाहरंतीममितिहासंपुरातनं॥ गजेंद्रमोक्षणंपुण्यंसकल
स्याकिल्बिषकर्मणः॥२२॥सर्वरत्नमयःश्रीमान्त्रिकुटोनामपर्वतः
सुतःपर्वतराजस्यसुमेरोर्भास्करद्युतिः॥२३॥क्षीरोदजलविच्य
ग्रेधौतामलशिलातलः॥उत्थितःसागरंभित्वादेवर्षिगणसेवि
तः॥२४॥अप्सरोभिःपरिवृतःश्रीमान्प्रस्रवणाकुलः॥गंध
र्वैःकिंनरैर्यक्षैःसिद्धचारणपन्नगैः॥२५॥मृगे।द्वीपैर्गजेंद्रैश्चव
नगात्रोविराजते॥पुन्नागैःकर्णिकारैश्चसबिल्वैर्दिव्यपाटलैः
॥२६॥आम्रनिंबकदंबैश्चचंदनागरुचंपकैः॥शालैस्तमाले
स्तमालैश्चनरूभिश्चार्जुनैस्तथा॥२७॥बकुलैःकुंदपुष्पैश्चस
रलैर्देवदारुभिः॥मंदारकुसुमैश्चान्यैःपारिजातैश्चसर्वशः॥२८॥

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com